# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-१ ( Sem_2 )** **प्रश्नपत्र-६** **गुणाः - ७०**

**विषयः - स्वामिनारायणवेदान्तः ( S )** CC 1.2.4 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - २३-०४-२०१६** **सन्दर्भग्रन्थः - श्रीहरिगीता**

---

### युनिट-१

**प्रश्नः -१ त्रिषु द्वौ व्याख्यात ।** ०८

*(१) भावप्रबोधिन्यनुसारं ज्ञानलक्षणम् ।*

*(२) जाग्रदादिष्वस्थासु स्थूलादिषु वपुष्षु च ।*
*बद्धस्तादात्म्यसम्बन्धाद् वस्तुतस्तद्विलक्षणः ॥*

*(३) सच्चिद्रूपोऽक्षरः सूक्ष्मो दुर्ज्ञेयश्च स वर्तते ।*
*इत्थं यदात्मो ज्ञानमात्मज्ञानं तदुच्यते ॥ - हेत्वानुसारं श्लोकमिमं निरूपयत ।*

**प्रश्नः -२ द्वयोरेकं निबध्नीत ।** ०८

*(१) वेराजपुरुषोत्पत्तिं तस्माच्चोत्पन्नानि तत्त्वानि लिखत ।*

*(२) स्वतन्त्रः स्वप्रकाशश्च सर्वकारणकारणम् ।*
*ब्रह्मभूतैप्युपास्यः कोटिसूर्यादिभास्वरः ॥ - श्लोकं हेतुटीकानुसारं निबध्नीत ।*

**प्रश्नः -३ द्वयोरेकं टिप्पयत ।** ०४

*(१) श्रोत्रं त्वक् चाक्षि जिह्वा च घ्राणो ज्ञानेन्द्रियाण्यथ ।*
*वाग्दोः पाद उपस्थश्च पायुः कर्मेन्द्रियानि च ॥*

*(२) स हरिस्त्वक्षरस्याथ प्रकृतेः पुरुषस्य च ।*
*प्रधानपुरुषाणां च महदादिगणस्य च ॥*

**प्रश्नः -४ चतुर्षु द्वौ संक्षेपेणोत्तरत ।** ०२

*(१) परब्रह्मणोऽन्यौ द्वौ पर्यायौ कौ ?* *(२) प्रकृतिपुरुषात् कस्योत्पत्तिः ?*

*(३) अहङ्कारः कतिविधः ?* *(४) सृष्टिस्थितिसंहारः कर्तारः के ?*

### युनिट-२

**प्रश्नः -५ त्रिषु द्वौ ससन्दर्भं व्याख्यात ।** ०८

*(१) प्रलयचतुष्टयवर्णनम् ।* *(२) पापिक्रियावर्णनम् ।* *(३) नरकदुःखवर्णनम् ।*

**प्रश्नः -६ द्वयोरेकं वर्णयत ।** ०८

*(१) गर्भदुःखम् ।* *(२) नरकनामानि विलिख्य तद्वर्णनम् ।*

**प्रश्नः -७ द्वयोरेकं टिप्पयत ।** ०४

*(१) वैराग्यलक्षणम् ।* *(२) यमदूतद्वारा पापिजीवानां नयनम् ।*

*(३) मनूक्तसन्दर्भेण सुरामद्यवैविध्यम् ।* *(४) भावप्रबोधिनीरीत्या प्राकृतप्रलयवर्णनम् ।*

**प्रश्नः -८ द्वयोः लघूत्तरं लिखत ।** ०२

*(१) नित्यप्रलयस्य किं लक्षणम् ?*

*(२) रमणीयचरणाः कां योनिं प्रपद्यन्ते ?*

*(३) हेतुटीकायां भगपदस्य कोऽर्थः लिखितः ?*

*(४) कशापदस्य किं वाच्यम् ?*

*(५) यमराजस्य को लेखकः ?*

*(६) केषां वैराग्यमुदेति ?*

*(७) के परां गतिं प्राप्नुवन्ति ?*

## युनिट-३

**प्रश्नः -९ अधस्तनेषु द्वौ विषयौ व्याख्यात ।** ०८

*(१) यत्संसेवनतश्च पद्मनिलयादिभ्योऽपि कीर्तिं ययुः ।*
*भूयिष्ठां व्रजयोषितः कविवरव्यासादिगेयां भुवि ॥*
*तल्लीलानरनाटनस्य चरणं वृन्दावने नदोर्मुदा*
*सेव्यं संसृतिमुक्तिकामुकनरैस्तेषां हि नान्यो गतिः ॥*

*(२) वन्दनभक्तिनिरूपणम् ।*

*(३) आत्मनिवेदिलक्षणानि ।*

**प्रश्नः -१० टीकाद्वयानुसारेण द्वयोरेकं परिचाययत ।** ०८

*(१) अर्चनभक्तिः ।* *(२) जातिव्रत्यभक्तिः ।*

**प्रश्नः -११ चतुर्षु द्वौ टिप्पयत ।** ०४

*(१) भज्धतोस्तु सेवार्थः प्रेम क्तिन्प्रत्ययस्य च ।*
*स्नेहेन भगवत्सेवा भक्तिरित्युच्यते बुधैः ॥*

*(२) श्रवणभक्तिनिरूपणम् ।*

*(३) सकाम-निष्कामभक्तनिरूपणम्*

*(४) हरिगीतान्तर्गतशास्त्राणां नामानि ।*

**प्रश्नः -१२ पञ्चानां लघूत्तरं लिखत ।** ०५

*(१) भक्तेः कति भेदाः ?*

*(२) केषां भक्तानां कथा श्रव्या ?*

*(३) गङ्गा केषु मार्गेषु वहति ?*

*(४) अर्चनं कतिविधम् ?*

*(५) महती पूजा कदा कार्या ?*

*(६) भक्तो देहान्ते कीदृशं देहं प्राप्नोति ?*

*(७) हरिगीतायाः कति अध्यायाः ?*

---------------------